# हरिकेशनल्लूर् मुत्तय्या भागवतर् वार कीर्तनानि

***(Part II : vāra kṛtis)***

***Compiled and typeset***
***using LaTeX $2_\varepsilon$ , pdfLaTeX, and dvng Type I fonts***

**©July 2002**

## 1 ādityam

# आदित्यं देवादिदेवम्

रागं : मायमाळवगौळ ताळं : आदि

## पल्लवि

आदित्यं देवादिदेवं अखिलाण्डनाथं आश्रये

## अनुपल्लवि

वेदवेद्यं कावाद्यं तेदीप्यमानतेजसमाद्यम्

## चरणम्

सकलचराचर कर्मसक्षिणं विकलसर्वजग गगतं

करणम्

प्रकट निखिलसौभाग्यकारणं
अकळङ्क हरिकेशभरणम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 2 candraṃ bhaje

# चन्द्रं भजे

रागं : पूर्णचन्द्रिक ताळं : चापु

## पल्लवि

चन्द्रं भजे कान्तिसान्द्रं सुधापूर्ण चन्द्रं भजे

## अनुपल्लवि

इन्द्रादिदेव भरणं रुद्र शङ्कर जटाभरणम्

## चरणम्

क्षीराम्बुधि नवनितं मा रमण मनोजातं
आराधित हरिकेशं तारकाधिप मोक्षदीशम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 3 aṅgāraka maṅgaḷa

# अङ्गारक मङ्गळ

रागं : रीतिगौळ ताळं : रूपकम्

## पल्लवि

अङ्गारक मङ्गळ मूर्ते आनन्दपूर्ते

## अनुपल्लवि

गङ्गधरजटाभोग गगनभाग पद्मराग

## चरणम्

भूमिप्रद पूरिदयापूरितं ऋतुदमहृदय
मामक पापानि समय मकरराशिप्रिय
श्री मानित हरिकेश सेवक मां पलय

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 4 rohiṇeyam

# रोहिणेयं बुधम्

रागं : सुरटि    ताळं : खण्ड चापु

## पल्लवि

रोहिणेयं बुधं रूपजित मन्मथम्

## अनुपल्लवि

मोहमायातीतं मोदमयविग्रहं
देहि शोकापहं दिव्यकवितावहम्

## चरणम्

पुस्तकरं चितकरं पूतमणिमयमकुटं

मस्तकं कन्यकामिथुनराश्याधिपम्

निस्तुलदयामकुट निरवद्यसुमतिं
शस्त हरिकेश घनशासनाञ्चित गतिम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 5 vācaspatim

# वाचस्पतिं भजे

रागं : सहान  ताळं : रूपकम्

## पल्लवि

वाचस्पतिं भजे वरदं जीवं श्री

## अनुपल्लवि

मोचामय वाचा रस वीशि वितरणशीलम्

## चरणम्

पाकारि साम्राज्य पालन दीक्षणं
लोकायतनीति निहित लोल गानवघणं
एकान्तशुभतं कोमेधिकमणिहारम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 6 śrībārgavam

# श्री भार्गवम्

रागं : श्री    ताळं : आदि

## पल्लवि

श्री भार्गवं चिन्तयामि श्रेयसे
भूयसे सीमातीतवैभवम्

## अनुपल्लवि

लोभमोहमतलोल विरुद्धं
शोभीह्रीरमणि धवळ शरीरम्

## चरणम्

त्याग योगमय विभूतिकरं रागताळलयराजविहारं
यागयोगफल हरिकेशपालं भोगजनित ललित
कालधरम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 7 chāyādevīpriyatanayam

# छायदेवीप्रियतनयम्

रागं : बेगड ताळं : आदि

## पल्लवि

छायदेवीप्रियतनयं सदा स्मरामि सविनयम्

## अनुपल्लवि

मायामय जगदायासहरं माहेन्द्रनीलमणि हारम्

## चरणम्

शमनसोदरं शनैश्चरं अमितानद हरिकेशप्रियं

कमनीयदेहं काकवाहं विमल मारुति भक्तभरण

प्रवीणं मकर कुंभराश्याधिपतिम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇